# ब्राह्मी वेदयताद्ब्रह्म विद्यां प्रददती पराम्

ड. हरेकृष्णपट्टजोशी

यामन्तरेण जगतोऽखिललोकयात्रा
नो वै चलत्यतितरां तमसि प्रविष्टा।
वागीश्वरीं भगवतः परमां च शक्तिं
तां चिन्तयामि सततं परमार्थसिद्ध्यै। १।

त्वद्दिव्यरूपममलं कविभिर्यदुक्तं
कुन्देन्दुशुभ्रमिति संस्खलितैर्वचोभिः।
तत्ते प्रियं भवति मातुरिवार्भकस्य
यत्ते गता भुवि पुरा महतीं प्रतिष्ठाम्॥ २।

शुभ्राम्बरेण लसितं सितगात्रमेत-
न्मातर्यदुक्तमिति तन्नितरां मनोज्ञम्।
ये ते समर्चनरता खलु ते यशोभी
राजन्ति सन्ततमहो कवयः सुशुभ्रैः॥ ३।

वीणाविनिर्गतवचो मुनयो निशम्य
यस्या विधूतशमलाः समवाप्तकामाः।
ब्रह्मामृतं ह्यनुभवन्ति मुदा समाधौ
तत् संस्फुरत्वतितरां हृदये मदीये॥ ४।

हंसासने विलसितं तव पादपद्मं
भक्त्या सदा परमया खलु ये स्मरन्ति।
आदाय सारमिह ते परिहाय हेयं
विष्णोस्तदेव परमं पदमाविशन्ति॥ ५।

